# रम्यसंस्कृतम्। सङ्ख्याविशेषणानि – १। तृतीयः घटकः।



**संवादम् इमं पठत।**

[ग्रीष्मावकाशे दौहित्राः दौहित्र्यः च मातामह्या सह केवलं संस्कृतेन वार्तालापं कुर्वन्ति। मातामही तेभ्यः संस्कृतभाषायाः विशेषान् कथयति।]

मातामही – अस्माकं बाल्यकाले दूरदर्शने एकात्मतायाः एकं गीतम् आसीत्। तद् गायामः –

**एका चटका, अनेकाश्चटकाः।**
**धान्यम् अत्तुम् आयाताश्चटकाः॥**

सुधेन्दुः – मातामही गतसमये त्वया चतुरस्य काकस्य कथागीतं श्रावितम्।

**एकः काकः तृषापीडितः।**
**जलं न लभते दूरे दूरे॥**

तत्र एकः काकः इति उक्तम्। अधुना अत्र एका चटका इति वदसि।

पृथा – आम्। तथा च 'एकं गीतम्' इत्यपि उक्तम्। तर्हि किमर्थम् अत्र एकः, एकम् इति भेदः ?

वेणुः – (चिन्तयित्वा) हं.. मया ज्ञातम्। यथा एकः बालः, एका बाला, एकं वनम्।

मातामही – बहु सम्यक् वेणो।

सुधेन्दुः – तर्हि एकः चषकः, एका लेखनी, एकं फेनकम्। अपि योग्यमेतत् ?

मातामही – बाढम्। सम्यक् अवगतं त्वया। इतोऽपि एकम् आङ्ग्ल-बालगीतं यूयं गायथ स्म। अपि स्मरथ?

**द्वौ लघू हस्तौ तालिकावादनाय। द्वौ लघू पादौ गमनागमनाय।**
**द्वे लघू नेत्रे नभोदर्शनाय।...**

पृथा – मातामहि, अवगतं मया। तथा च द्वौ-द्वे एतयोः भेदोऽपि ज्ञातः। यथा द्वौ पुरुषौ, द्वौ दीपौ।

वेणुः – द्वे फले, द्वे उद्याने।

सुधेन्दुः – महिलाद्वयं वा द्रोणीद्वयम् इति कथं वक्तव्यम् ?

मातामही – द्वे महिले द्वे द्रोण्यौ वा। इदानीमहं सङ्ख्याशृङ्खलां वदामि। कथयत किमेतत् ?
त्रयः तिस्रः त्रीणि। चत्वारः चतस्रः चत्वारि॥

सुधेन्दुः – (हसित्वा) मया अवगतम्। **त्रयः** वृक्षाः, **तिस्रः** मक्षिकाः, **त्रीणि** फलानि।...

पृथा – तिष्ठ रे। अग्रे अहं वदामि। **चत्वारः** मुनयः, **चतस्रः** धेनवः, **चत्वारि** वाहनानि।

मातामही – सुशोभनम्। चाणाक्षाः यूयम्।

वेणुः – इतः परं वयं एकतः चतुःपर्यन्तं सङ्ख्यारूपाणि पठामः।

मातामही – साधु। साधु।

## एकत: चतु:पर्यन्तं सङ्ख्यारूपाणि

| एक (नित्यम् एकवचनम्) | | | | द्वि (नित्यं द्विवचनम्) | | |
|---|---|---|---|---|---|---|
| पुं. | स्त्री. | नपुं. | विभक्ति: | पुं. | स्त्री. | नपुं. |
| एक: | एका | एकम् | प्रथमा | द्वौ | द्वे | द्वे |
| एकम् | एकाम् | एकम् | द्वितीया | द्वौ | द्वे | द्वे |
| एकेन | एकया | एकेन | तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्मै | एकस्यै | एकस्मै | चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्मात् | एकस्या: | एकस्मात् | पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्य | एकस्या: | एकस्य | षष्ठी | द्वयो: | द्वयो: | द्वयो: |
| एकस्मिन् | एकस्याम् | एकस्मिन् | सप्तमी | द्वयो: | द्वयो: | द्वयो: |

| त्रि (नित्यं बहुवचनम्) | | | | चतुर् (नित्यं बहुवचनम्) | | |
|---|---|---|---|---|---|---|
| पुं. | स्त्री. | नपुं. | विभक्ति: | पुं. | स्त्री. | नपुं. |
| त्रय: | तिस्र: | त्रीणि | प्रथमा | चत्वार: | चतस्र: | चत्वारि |
| त्रीन् | तिस्र: | त्रीणि | द्वितीया | चतुर: | चतस्र: | चत्वारि |
| त्रिभि: | तिसृभि: | त्रिभि: | तृतीया | चतुर्भि: | चतसृभि: | चतुर्भि: |
| त्रिभ्य: | तिसृभ्य: | त्रिभ्य: | चतुर्थी | चतुर्भ्य: | चतसृभ्य: | चतुर्भ्य: |
| त्रिभ्य: | तिसृभ्य: | त्रिभ्य: | पञ्चमी | चतुर्भ्य: | चतसृभ्य: | चतुर्भ्य: |
| त्रयाणाम् | तिसृणाम् | त्रयाणाम् | षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| त्रिषु | तिसृषु | त्रिषु | सप्तमी | चतुर्षु | चतसृषु | चतुर्षु |

### सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।

अ) _______ (४) महिलाभ्य: तण्डुलान् आनय।

आ) तेषु _______ (३) तरुषु खगा: नीडानि अरचयन्।

इ) _______ (१) कपे: टोपिका पतिता।

ई) एतासु _______ (२) कृती लिखन्तु।

उ) _______ (३) भुवनानां समूह: नाम त्रिभुवनम्।

ऊ) _______ (१) दासी सन्देशं कथितवती।

ए) तयो: _______ (२) परस्परमेलनं न आसीत्।

ऐ) _______ (१) नगरे स: वसति स्म।

ओ) _______ (२) अपि कवी काव्यम् अपठताम्।

औ) कथामेताम् _______ (४) छात्रेभ्य: कथय।

अं) अहं _______ (३) चौरान् अपश्यम्।

क) वयं _______ (४) गीतानि गायाम:।

ख) स: _______ (४) वेदान् अधीतवान्।

ग) वयं _______ (२) नेत्राभ्यां पश्याम:।

घ) शिव: _______ (३) नेत्रै: पश्यति।

### हसत नन्दत !

१) नीता – आचार्ये सा गौरी किमपि न करोति। आदिनं उपविश्य केवलं व्यर्थं समययापनं करोति।
शिक्षिका – अस्तु। किन्तु त्वं कथम् एतत् जानासि ?
नीता – अहं तु सर्वदा, तामेव पश्यामि खलु !



२) शिक्षिका – छात्रा:, ह्य: भूतकाल: पाठित: किल? अधुना मिहिके, भूतकालस्य एकम् उदाहरणं कथय।
मिहिका – आचार्ये, अहं तु ह्य: अनुपस्थिता आसम्।
शिक्षिका – उत्तमं मिहिके ! त्वया सम्यक् भूतकाल: ज्ञात: !

# रम्यसंस्कृतम्। सङ्ख्याविशेषणानि – २।

## संवादम् इमं पठत।



मातामही – एकत: चतु:पर्यन्तं सङ्ख्यारूपाणि अधीतानि खलु ? पश्चत: तु सङ्ख्यारूपेषु न लिङ्गभेद:। ता: यथावत् प्रयोक्तव्या:।

वेणु: – ज्ञातम्। तर्हि पञ्च आसन्दा:, पञ्च अङ्कन्य: पञ्च भवनानि वा।

सुधेन्दु: – तथा च सप्त बटव:, सप्त रज्जव:, सप्तैव च दिनानि।

पृथा – इतोऽपि अष्ट तारका:, अष्ट मुनय:, अष्ट वसूनि।

मातामही – उत्तमम्। काश्चन सङ्ख्या: प्रसिद्धा:। यथा नव रात्रय: ...

वेणु: च पृथा च – सप्त ऋषय:, दश आननानि, अष्ट लक्ष्म्य:... त्रीणि भुवनानि, नव रत्नानि वा।

मातामही – पर्याप्तम्। अहम् अधुना कूटप्रश्नं वदामि। **भि: – भ्य: – भ्य: – आनाम् – सु**। किम् एतद् ?

सुधेन्दु:– (उच्चै: हसित्वा) न एष: कूटप्रश्न:। एते तु विभक्तिप्रत्यया:। गतवर्षे अहं पठितवान् सम्यक् स्मरामि अधुना अपि।

वेणु: – ओहो सुधेन्दो ! सत्यमेव तीक्ष्णा जाता तव बुद्धि:। तर्हि एते सङ्ख्याप्रत्यया: तृतीयात: सप्तमीपर्यन्तम्।

पृथा– यथा – **पञ्च, पञ्च, पञ्चभि:, पञ्चभ्य:, पञ्चभ्य:, पञ्चानाम्, पञ्चसु**। पश्चत: नवदशपर्यन्तं रूपाणि पञ्च सङ्ख्या इव भवन्ति। सत्यं खलु ?

मातामही – आम्, अतीव मुदिताऽस्मि। यूयं सर्वे संस्कृतपटव:। इत:परं संस्कृतभाषया खेलितुं समर्था:।

सुधेन्दु:– तत्तु त्वया सह सम्भाषणेन किञ्चिद् व्याकरणाभ्यासेन च।

वेणु: – सङ्ख्यारूपाणि सम्यगधीत्य सम्भाषणे सङ्ख्यानाम् अधिकं प्रयोगं कुर्म:।

पृथा – अग्रिमे अवकाशे अन्यान् सङ्ख्याविशेषान् ज्ञातुम् आगच्छाम:।

C.JNBGB

जिज्ञासापत्रम्



## सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।

१. तत्र ______ (५) बालकेषु कलह: उद्भूत:।
२. ______ (६) बिडालै: एक: एव मूषक: दृष्ट:।
३. ______ (७) दीपानाम् एका आवलि: गृहे दृश्यते।
४. ______ (९) रात्रीणां समूह: नाम नवरात्रम्।
५. अपि जानासि ______ (७) ऋषीणां नामानि ?
६. कार्तिकेय: ______ (६) मुखै: वदति किम् ?
७. रावणस्य ______(१०)मस्तकेभ्य: किरीटा: पतिता:।
८. ______ (८) लक्ष्मीषु कति नामानि जानासि ?
९. राजा ______ (९) ऋषिभ्य: दानं दत्तवान्।
१०. ______ (६) वस्तुभ्य: ______ (३) वस्तूनि आवश्यकानि।
११. अस्माभि: ______ (८) भूपतीनां चरित्राणि पठितानि।

### सङ्ख्यारूपाणि

| (नित्यं बहुवचनम्) | | | |
|---|---|---|---|
| **षष्** | **अष्टन्** | **नवन्** | **विभक्ति:** |
| षट्/षड् | अष्ट / अष्टौ | नव | प्रथमा |
| षट्/षड् | अष्ट / अष्टौ | नव | द्वितीया |
| षड्भि: | अष्टभि:/ अष्टाभि: | नवभि: | तृतीया |
| षड्भ्य: | अष्टभ्य:/ अष्टाभ्य: | नवभ्य: | चतुर्थी |
| षड्भ्य: | अष्टभ्य:/ अष्टाभ्य: | नवभ्य: | पञ्चमी |
| षण्णाम् | अष्टानाम् | नवानाम् | षष्ठी |
| षट्सु/ षट्त्सु | अष्टसु/ अष्टासु | नवसु | सप्तमी |